[८२२] अश्ववृषयोर्मैथुनेच्छायामिति वक्तव्यम् । (म.भा. ३.२५८)

[८२३] क्षीरलवणयोर्लालसायामिति [1]वक्तव्यम् । (म.भा. ३.२५८)

तृष्णातिरेको लालसा । अन्यत्रात्मप्रीतावपि न भवति । अपर आह –

[८२४] सर्वप्रातिपदिकेभ्यो लालसायामसुग्वक्तव्यः । (म.भा. ३.२५८)

दध्यस्यति, मध्वस्यति इत्येवमाद्यर्थम् । अपर आह –

[८२५] सुग्वक्तव्यः । (म.भा. ३.२५८)

दधिस्यति, मधुस्यति इत्येवमाद्यर्थम् ॥

## आमि सर्वनाम्नः सुट् । (५२/२१७)

आत् इति वर्तते । अवर्णात् सर्वनाम्न उत्तरस्य आमः सुडागमो भवति । सर्वेषाम् । विश्वेषाम् । येषाम् । तेषाम् । [2]सर्वासाम् । यासाम् । तासाम् । आत् इत्येव । भवताम् । आमि इति षष्ठी-बहुवचनं गृह्यते, [3]न 'ङेराम् नद्याम्नीभ्यः' (८.३.११६/२४७१) इति, तस्य हि परत्वात् आड्याट्स्याटो भवन्ति । यश्च धात् आमुः (५.४.११/२००४), आमश्च लिटि (३.१.३५/२३०६), न तौ सर्वनाम्नः स्तः । सानुबन्धकौ इति वा तौ न गृह्येते । आमि इति सप्तमीनिर्देशः उत्तरार्थः । इह तु सर्वनाम्नः इति पञ्चमीनिर्देशात् 'तस्मादि-त्युत्तरस्य' (१.१.६७/४१) इति, [4]षष्ठीप्रक्लृप्तिर्भविष्यति ॥

## त्रेस्त्रयः । (५३/२६४)

त्रि इत्येतस्य आमि परे त्रय इत्ययमादेशो भवति । त्रयाणाम् । त्रीणाम् इत्यपि छन्दसि [5]इष्यते । [6]त्रीणामपि समुद्राणाम्[7] इति ॥

## ह्रस्वनद्यापो नुट् । (५४/२०८)

ह्रस्वान्तात् नद्यन्तात् आबन्ता[8]च्चोत्तरस्य आमः नुडागमो भवति । ह्रस्वान्तात् [9]तावत् – वृक्षाणाम् । प्लक्षाणाम् । अग्नीनाम् । [10]वायूनाम् । कर्तॄणाम्[11] । नद्यन्तात् – कुमारीणाम् । [12]किशोरीणाम् । [13]गौरी-णाम् । शार्ङ्गरवीणाम् । लक्ष्मीणाम् । ब्रह्मबन्धूनाम् । [14]वीरबन्धूनाम् । आबन्तात् – खट्वानाम् । मालानाम् । बहुराजानाम् । कारीषगन्ध्यानाम् ॥

## षट्चतुर्भ्यश्च । (५५/३३८)

षट्सञ्ज्ञकेभ्यः चतुःशब्दाच्चोत्तरस्यामो नुडागमः भवति । षण्णाम् । पञ्चानाम् । सप्तानाम् । नवानाम् । दशानाम् । चतुर्णाम् । रेफान्तायाः सङ्ख्यायाः षट्सञ्ज्ञा न विहिता, 'षड्भ्यो लुक्' (७.१.२२/२६१) इति लुग् मा भूत्[15] । बहुवचननिर्देशादत्र सङ्ख्या[16]प्रधानस्य ग्रहणं भवति । [17]परमषण्णाम् । [18]परम-पञ्चानाम् । [19]परमसप्तानाम् । परमचतुर्णाम् । [20]उपसर्जनीभूतायास्तु सङ्ख्यायाः न भवति, प्रियषषाम्, [21]प्रियपञ्चाम्, प्रियचतुराम् इति ॥

---

1. वक्तव्यम् नास्ति फ.इ. 2. सर्वासाम् यासाम् तासाम् नास्ति ई. 3. न तु क. 4. षष्ठीप्रकल्पिता भवति ब.ई. 5. लभ्यते क, सर्वे विधयः छन्दसि विकल्प्यन्ते इत्यधिकम् ह. 6. त्रीणामिव इ. 7. युगान्तेषु समागमः इत्यधिकम् इ.ई. 8. अङ्गात् इत्यधिकम् क.ई. 9. तावत् नास्ति क. 10. बहूनाम् इत्यधिकम् इ. 11. हर्तॄणाम् इत्यधिकम् ई. 12. शौरीणाम् ब. 13. गौरीणाम् नास्ति ब. 14. वीरबन्धूनाम् नास्ति ब.क. 15. इति इत्यधिकम् ई. 16. प्रधानस्यापि तदन्तग्रहणम् क.फ. 17. परमषण्णाम् नास्ति क. 18. परमपञ्चानाम् नास्ति ब. 19. परमसप्तानाम् नास्ति क. 20. उपसर्जनीभूता षट्सञ्ज्ञा तत्र न भवति क, उपसर्जनीभूतायाम् तु सङ्ख्यायाम् न भवति इ.ई. 21. प्रियपञ्चाम् नास्ति क.